# १२ तृतीया - ए.व. + ब.व.

आचार्यः - प्रियच्छात्राः ! अहं **सुधाखण्डेन** कृष्णफलके एकं चित्रं लिखामि । तत् दृष्ट्वा भवन्तः सर्वे **अङ्कन्या** लिखन्तु ।

छात्रः १ - श्रीमन् ! अहं **लेखन्या** लिखानि किम् ?

आचार्यः - रेखालेखने दोषः भवति चेत् ?

छात्रः १ - अहं **जागरूकतया** लिखामि ।

आचार्यः - भवतु । ये वर्णलेखनीम् आनीतवन्तः ते **वर्णलेखन्या** लिखन्तु ।

छात्रः २ - श्रीमन् ! अहं **कूर्चेन** लिखानि किम् ?

आचार्यः - भवतु, इदानीं सर्वे लिखन्तु । जलजे, भवती **वेगेन** मा लिखतु । अहो, एषः **कष्टेन** चित्रं लिखति ! चन्द्र, किमर्थं **खेदेन** उपविष्टः भवान् ?

चन्द्रः - अहम् अङ्कनीं लेखनीं वा न आनीतवान् । **त्वरया** आगमनसमये विस्मृतवान् ।

आचार्यः - चिन्ता मास्तु । मम अङ्कनीं स्वीकरोतु । सर्वे **उत्साहेन श्रद्धया** च लिखन्तु ।

## विशेषः

- **तृतीयाविभक्तिः**

| पुंलिङ्गे<br>प्रथमा तृतीया ए.व. ब.व | | | स्त्रीलिङ्गे<br>प्रथमा तृतीया ए.व. ब.व | | | नपुंसकलिङ्गे<br>प्रथमा तृतीया ए.व.ब.व | | |
|---|---|---|---|---|---|---|---|---|
| बालकः | बालकेन | बालकैः | महिला | महिलया | महिलाभिः | चित्रम् | चित्रेण | चित्रैः |
| कूर्चः | कूर्चेन | कूर्चैः | लेखनी | लेखन्या | लेखनीभिः | (नपुंसकलिङ्गे तृतीयाविभक्तितः पुंलिङ्गवत् एव रूपाणि) | | |
| सः | तेन | तैः | सा | तया | ताभिः | | | |
| एषः | एतेन | एतैः | एषा | एतया | एताभिः | | | |
| कः | केन | कैः | का | कया | काभिः | | | |
| भवान् | भवता | भवद्भिः | भवती | भवत्या | भवतीभिः | | | |
| त्रिषु लिङ्गेषु - अहम् - मया - अस्माभिः | | | | | | | | |

तृतीयाविभक्तिः
- साधनस्य – सुधाखण्डेन, अङ्गुल्या, दण्डेन, छुरिकया
- गुणवाचकस्य – सन्तोषेण, खेदेन, त्वरया, जागरूकतया

**अभ्यासः - ५३**

अधः साधनानां राशिः अस्ति । तेषां साहाय्येन अधस्तनप्रश्नानाम् उत्तराणि लिखत ।

१. छात्रः कया लिखति ?

.................................................. ।

२. माता कया परिवेषयति ?

.................................................. ।

३. सौचिकः कया वस्त्रं कर्तयति ?

.................................................. ।

४. छात्रः केन पुस्तकानि नयति ?

.................................................. ।

५. कृषिकः केन वृषभं ताडयति ?

.................................................. ।

६. वर्णकारः केन वर्णं लिम्पति ?

.................................................. ।

७. लोहकारः केन अयः ताडयति ?

.................................................. ।

८. कर्मकरः केन तृणं कर्तयति ?


.................................................. ।

९. बालकाः केन क्रीडन्ति ?

.................................................. ।

१०. धनिकः केन देहलीनगरं गच्छति ?

.................................................. ।



# १३ सह, विना

भूषणः - कुमार ! गृहे कोऽपि नास्ति किम् ?

कुमारः - अहम् एकः एव अस्मि । पिता **मित्रेण** सह 'क्लब्' गतवान् । माता **प्रतिवेशिन्या** सह मन्दिरं गतवती । भगिनी **रेखया** सह आपणं गतवती ।

भूषणः - श्रीधरः क्व ?

कुमारः - सः **मित्रेण** सह इदानीं गतवान् । त्वराकारणतः स **पादरक्षया** विना एव गतवान् ।

भूषणः - मादृशः एव सः । आपणतः वस्तूनि आनय इति माता माम् उक्तवती आसीत् । किन्तु अहं **स्यूतेन** विना आगतवान् ।

कुमारः - भवान् **धनेन** विना तु न आगतवान् खलु ?

भूषणः - धनम् ! तिष्ठतु, पश्यामि । अहो ! **धनेन** विना एव.....

कुमारः - केचन **उदरेण** विना भोजनार्थं गच्छन्ति इति श्रूयते । तादृशः एव भवान् !!

**विशेषः**

*** सह** - सह इति पदं यत्र प्रयुज्यते तत्र तृतीयाविभक्तिः भवति ।

उदा - अहं **मित्रेण सह** आपणं गच्छामि ।

पुत्री **जनन्या सह** गच्छति ।

| शुद्धम् | अशुद्धम् |
|---|---|
| तेन सह | तस्य सह |
| मया सह | मम सह |
| जनन्या सह | जनन्याः सह |
| रामेण सह | रामस्य सह |

*** विना** –विना इति शब्दस्य योगे अपि तृतीयाविभक्तिः भवति । (अत्र द्वितीयां, पञ्चमीं वापि प्रयोक्तुं शक्नुमः ।)

उदा – १. तेन विना/तं विना/तस्मात् विना एषः न गच्छति ।

२. जलेन विना/जलं विना/जलात् विना मीनः न जीवति ।

**अभ्यासः – ५५**

मन्दारः सञ्चारशीलः । सः कदाचित् अन्येन सह गच्छति । पुनः कदाचित् अन्येन विना गच्छति । अधस्तनकोष्ठके '✓' इति चिह्नं 'सह' इति अर्थं, '✗' इति चिह्नं 'विना' इति अर्थं च प्रदर्शयति । तदाधारेण वाक्यानि रचयत ।

| | | | |
|---|---|---|---|
| १. मित्रम् ✓ | मित्रगृहम् | २. भगिनी ✓ | मातुलगृहम् |
| ३. अनुजा ✗ | चित्रमन्दिरम् | ४. पत्नी ✗ | कार्यालयः |
| ५. शुनकः ✓ | वायुविहारार्थम् | ६. गृहसदस्याः ✓ | उद्यानम् |
| ७. पितामही ✓ | मन्दिरम् | ८. कर्मकरः ✗ | क्षेत्रम् |
| ९. करदीपः ✗ | रक्षणार्थम् | १०. उपनेत्रम् ✗ | ग्रन्थालयः |
| ११. स्यूतः ✗ | आपणः | १२. धनम् ✗ | कुत्रापि न |
| १३. मित्राणि ✓ | नाटकं द्रष्टुम् | १४. स्नानवस्त्रम् ✗ | स्नानगृहम् |
| १५. जनाः ✓ | भाषणं श्रोतुम् | १६. पुस्तकानि ✓ | विद्यालयः |

उदा – १. मन्दारः **मित्रेण सह** मित्रगृहं गतवान् ।

२. मन्दारः ............................................. मातुलग्रामं गतवान् ।

३. मन्दारः ............................................................................. ।

४. मन्दारः ............................................................................. ।

५. मन्दारः ............................................................................. ।

६. मन्दारः ............................................................................. ।

७. मन्दारः ........................................................................ ।

८. मन्दारः ........................................................................ ।

९. मन्दारः ........................................................................ ।

१०. मन्दारः ........................................................................ ।

११. मन्दारः ........................................................................ ।

१२. मन्दारः ........................................................................ ।

१३. मन्दारः ........................................................................ ।

१४. मन्दारः ........................................................................ ।

१५. मन्दारः ........................................................................ ।

१६. मन्दारः ........................................................................ ।

**अभ्यासः - ५६**

कः/का/किं केन विना न शोभते इति अधः निर्दिष्टम् अस्ति । तदाधारेण वाक्यानि रचयत ।

| | |
|---|---|
| १. अध्यक्षः - सभा | ७. दूरवाणी - कार्यालयः |
| २. पुत्रः - गृहस्थः | ८. फलानि - वृक्षः |
| ३. गृहिणी - गृहम् | ९. वृक्षाः - उद्यानवनम् |
| ४. लवणम् - पाकः | १०. तिलकम् - तरुण्याः मुखम् |
| ५. सम्भाषणम् - संस्कृतज्ञः | ११. राष्ट्रभक्ताः - देशः |
| ६. चित्राणि - पुस्तकम् | १२. सेवाभावः - नागरिकः |

उदा - १. **अध्यक्षेण विना** सभा न शोभते ।

२. ........................................ गृहस्थः न शोभते ।

३. ........................................ गृहं न शोभते

४. ........................................ न शोभते ।

५. ........................................ न शोभते ।

६. ........................................ न शोभते ।

७. ........................................ न शोभते ।

८. ........................................ न शोभते ।

९. ........................................ न शोभते ।

१०. ........................................ न शोभते ।

११. ........................................ न शोभते ।

१२. ........................................ न शोभते ।